विषय - व्याकरणम् (1103) / भाग-1 (कारक+समास)

## अतिलघूत्तरीयाः प्रश्नाः

प्रश्नाः -

(1) कारकाणि कति ?

(2) कर्त्रर्थे का विभक्तिः ?

(3) कर्मणि का विभक्तिः ?

(4) करणार्थे का विभक्तिः ?

(5) सम्प्रदानार्थे का विभक्तिः ?

(6) अपादानार्थे का विभक्तिः ?

(7) सम्बन्धार्थे का विभक्तिः ?

(8) अधिकरणार्थे का विभक्तिः ?

(9) सम्बोधनार्थे का विभक्तिः ?

(10) 'अधिशीङ्स्थासां कर्म' इति सूत्रेण का विभक्तिः विधीयते ?

(11) 'अन्तरान्तरेणयुक्ते' इति सूत्रेण का विभक्तिः विधीयते ?

(12) "कर्तृकरणयोस्तृतीया" इति सूत्रेण का विभक्तिः विधीयते ?

(13) "रुच्यर्थानां प्रीयमाणः" इत्यनेन सूत्रेण किं विधीयते ?

(14) "नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च" इत्यनेन सूत्रेण का ~~विभ~~ विभक्तिः - विधीयते ?

(15) "अर्गादिभ्यो यञ्" इति सूत्रस्य उदाहरणं किम्?

(16) जातस्य गौत्रापत्यं ----?

(17) शुभ्रस्यापत्यं ----?

(18) जडस्यापत्यं -----?

(19) ब्रह्मणोऽपत्यं -----?

(20) "मनोर्जातावञ्यतौ षुक्च" इति सूत्रस्य उदाहरणं किम्?

(21) 'कषायेण रक्तं वस्त्रं ....?

(22) पुष्येण युक्तं ----?

(23) पितुर्भ्राता ----?

(24) पितुः पिता -----?

(25) युवतीनां समूहो ----?

(26) शिबीनां निवासो देशः.....?

(27) काण्वस्य छात्राः.......?

(28) गोस्थाने जातो ----?

(29) गम्भीरे भवं ----?

# युग्ममेलनम्

| (क) | (ख) |
|---|---|
| (30) रामः | (30) अव्ययीभावः |
| (31) कर्मणि | (31) पञ्चमी |
| (32) ग्रामगतः | (32) प्रथमाविभक्तिः |
| (33) अनुरूपम् | (33) द्वितीया |
| (34) हरये नमः | (34) तत्पुरुषः |
| (35) अपादाने | (35) चतुर्थी |
| (36) अश्वपतेः अपत्यम् | (36) पाञ्चकपालम् |
| (37) भानोः अपत्यम् | (37) गार्ग्यायणः |
| (38) पञ्चकपालस्येदं खण्डं | (38) जातायनः |
| (39) गार्ग्यस्य अपत्यम् | (39) आश्वपतम् |
| (40) जातस्य गोत्रापत्यम् | (40) भानवः |
| (41) ब्रह्मणोऽपत्यम् | (41) ब्राह्मणः |
| (42) पञ्चालानां राजा | (42) कषायेण रक्तं वस्त्रं |
| (43) काषायम् | (43) पाञ्चालः |
| (44) दाधिकम् | (44) वासिष्ठम् |
| (45) वसिष्ठेन दृष्टम् | (45) दध्नि संस्कृतम् |
| (46) काकम् | (46) कवचिनां समूहः |
| (47) अपोक्तार्थ्यः | (47) आरम्भः |
| (48) कावचिकम् | (48) काकानां समूहः |
| (49) चक्षुषा गृह्यते | (49) चाक्षुषम् |

# रिक्तस्थानानि पूरयत

(50) संख्यामात्रे ---- स्यात्। (प्रथमा, द्वितीया)

(51) अनुक्ते कर्मणि ---- स्यात्। (द्वितीया, तृतीया)

(52) ---- याचते ~~वसुधाम्~~ वसुधाम्। (बलिं, तत्)

(53) क्रियासिद्धौ प्रकृष्टोपकारकं ---- संज्ञं स्यात्। (कर्म, करण)

(54) गुरवे ----। (नमः, ~~[illegible]~~ गुरुः)

(55) कर्तृकर्मणोः ----। (कृतिः, श्रुतिः)

(56) यस्य च भावेन ----। (भावलक्षणम्, लक्षणम्)

(57) समर्थः ----। (पदविधिः, यज्ञविधिः)

(58) प्रथमानिर्दिष्टं ---- उपसर्जनम्। (कारक, समास)

(59) दुःखमतीतो ----। (सुखातीतः, दुःखातीतः)

(60) संख्यापूर्वो ----। (द्विगुः, द्वन्द्वः)

(61) विशेषणं विशेष्येण ----। (बहुलम्, प्रथमम्)

(62) मृगौ नेत्रे यासां ता ---- रात्रयः। (मृगनेत्रा, सुनयना)

(63) रामश्च लक्ष्मणश्च ----। (रामलक्ष्मणौ, रामलक्ष्मणेषु)

(64) पीलायां अपत्यं ----। (पीला, पैलः)

(65) तेन रक्तं ----। (रागात्, काशिका)

(66) पितृव्यमातुल ---- पितामहाः। (मातामह, महीपांशः)

(67) भिक्षाणां समूहो ----। (भिक्षा, भैक्षम्)

सूत्राणि पूर्ति:

(68) प्रातिपदिकार्थलिङ्ग ----- ?

(69) तथायुक्तं चा------- ?

(70) गतिबुद्धिप्रत्यवसानार्थ ----- ?

(71) कर्मप्रवचनीययुक्ते ---- ?

(72) येनाङ्ग ------- ?

(73) क्रुधद्रुहेर्ष्या-------- ?

(74) ध्रुवमपायेऽ------- ?

(75) वारणार्थाना-------- ?

(76) एवमानिर्दिष्टं ------ ?

(77) द्वितीया श्रितातीत------- ?

(78) तद्धितार्थोत्तरपद ----- ?

(79) कुगति ------- ?

(80) परवल्लिङ्गं द्वन्द्व------ ?

(81) चार्थे ---- ?

(82) समर्थानां -------- ?

(83) सुवोरना ------ ?

(84) राष्ट्रावारपारात् ----- ?

लघुत्तरीयाः

प्रश्नाः

(1) 'कारकम्' इत्यस्य का व्युत्पत्तिः ?

(2) प्रथमाविभक्तिः विधायकं सूत्रं किम् ?

(3) कर्मसंज्ञा विधायकं सूत्रं किम् ?

(4) द्वितीया विभक्तिः विधायकं सूत्रं किम् ?

(5) करणसंज्ञा विधायकं सूत्रं किम् ?

(6) तृतीया विभक्तिः विधायकं सूत्रं किम् ?

(7) सम्प्रदानसंज्ञा विधायकं सूत्रं किम् ?

(8) चतुर्थी विभक्तिः विधायकं सूत्रं किम् ?

प्रश्नाः लघूत्तरमाः

(9) अपादानसंज्ञा विधायकं सूत्रं किम्?

(10) पञ्चमी विभक्तिः विधायकं सूत्रं किम्?

(11) षष्ठी विभक्तिः विधायकं सूत्रं किम्?

(12) अधिकरणसंज्ञा केन सूत्रेण विधीयते?

(13) सप्तमी विभक्तिः विधायकं सूत्रं किम्?

(14) "दुह्याच्पच्दण्ड्-----" इति कारिकां लिखत।

(15) "येनाङ्गविकारः" इति सूत्रस्य उदाहरणं लिखत।

(16) 'ससखि' इत्यस्य सामासिक-पदस्य लौकिकविग्रहः किं भवति?

(17) वंशो कतिधा?

(18) 'द्विमुनि, त्रिमुनि' इत्यनयोः कः समासः?

प्रश्नाः लघूत्तरीयाः

1) "भीत्रार्थानां भयहेतुः" इत्यनेन सूत्रेण का विभक्तिः विधीयते ?

(20) "षष्ठी शेषे" इत्यनेन सूत्रेण का विभक्तिः विधीयते ?

(21) "कर्तृकर्मणोः कृतिः" इति सूत्रेण का विभक्तिः विधीयते ?

(22) "आधारोऽधिकरणम्" इति सूत्रेण किं ~~विभक्तिः~~ विधीयते ?

(23) सप्तमी विभक्तिः विधायकं सूत्रं किम् ?

(24) मूलतः समासः कति विधा ?

(25) तत्पुरुषसमासस्य भेदः वर्तते ?

(26) उपसर्जनसंज्ञा विधायकं सूत्रं किम् ?

(27) प्रायः संख्यापूर्वो कः समासः ?

(28) 'उपकृष्णम्' इत्यत्र कः समासः ?

(29) पञ्चगङ्गम्, द्वियमुनम् उभयोः कः समासः ? केन सूत्रेण च ?

## प्रश्नाः लघूत्तरीयाः

(31) 'गुडेन धानाः' इत्यस्य विग्रहस्य सामासिकं पदं समासं च लिखत।

(31) 'यूपदारु' इति पदस्य लौकिकविग्रहं किम्?

(32) 'चोरभयम्' इत्यस्य कः समासः?

(33) 'राजपुरुषः' इत्यस्य सामासिक-पदस्य लौकिकविग्रहः समासश्च लिखत।

(34) 'दशाननः' इति सामासिक-पदस्य लौकिकविग्रहः समासश्च लिखत।

(35) 'पितरौ' इति पदस्य लौकिक विग्रहः समासश्च लिखत।

(36) गोत्रसंज्ञा विधायकं सूत्रं किम्?

## तृतीयः प्रश्नाः

(37) प्रथमाविभक्तिः विधायकं सूत्रं उदाहरणसहितं लिखत।

(38) 'कर्तुरीप्सिततमं कर्म' इति सूत्रस्य वृत्तिं लिखत।

(39) "तथायुक्तं चानीप्सितम्" इति सूत्रस्य वृत्तिं उदाहरणञ्च लिखत।

(40) "अधिशीङ्स्थासां कर्म" इति सूत्रस्य वृत्तिं उदाहरणञ्च लिखत।

(41) 'कर्तृकरणयोस्तृतीया' इति सूत्रस्य व्याख्या कार्या?

(42) 'येनाङ्गविकारः' इति सूत्रस्य व्याख्या कार्या?

(43) "चतुर्थी संप्रदाने" इति सूत्रस्य सोदाहरणं व्याख्यां कुरु?

(44) "क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः" इति सूत्रस्य सोदाहरणं व्याख्या कार्या?

(45) "नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च" इति सूत्रस्य वृत्तिं उदाहरणसहितं लिखत।

(46) "भीत्रार्थानां भयहेतुः" इति सूत्रस्य अर्थं उदाहरणं च लिखत।

(47) "पृथग्विनानानाभिस्तृतीयान्यतरस्याम्" इति सूत्रस्य वृत्तिं लिखत।

(48) "कर्तृकर्मणोः कृतिः" इति सूत्रस्य वृत्तिं उदाहरणञ्च लिखत।

## दीर्घोत्तरीयाः प्रश्नाः

1) "अव्ययं विभक्तिसमीप......" इति सूत्रं ~~[illegible]~~ प्रपूर्य वृत्तिं लिखत।

(2) "संख्या वंश्येन" इति सूत्रस्य वृत्तिः उदाहरणञ्च लिखत।

(3) "नदीभिश्च" इति सूत्रस्य सोदाहरणं अर्थञ्च लिखत।

(4) "विशेषणं विशेष्येण बहुलम्" इति सूत्रस्य वृत्तिं लिखत।

(5) "कुगतिप्रादयः" इति सूत्रस्य व्याख्या कार्या?

(6) "नभ्राण्नपान्नवेदाना......" इति सूत्रं प्रपूर्य उदाहरणञ्च लिखत।

(7) "अनेकमन्यपदार्थे" इति सूत्रस्य व्याख्या कार्या?

(8) "चार्थे द्वन्द्वः" इति सूत्रस्य वृत्तिं उदाहरणञ्च लिखत।

(9) "विभाषावृक्षमृग......" इति सूत्रं प्रपूर्य उदाहरणञ्च लिखत।

(10) "अचतुरविचतुरसुचतुर......" इति सूत्रं प्रपूर्यतु?

(11) "तस्यापत्यम्" इति सूत्रस्य व्याख्या कार्या?

## दीर्घोत्तरीयाः प्रश्नाः

(12) गार्ग्यः, गार्ग्यायणः, वासिष्ठः, क्षत्रियः, एतेषु द्वयोः शब्दयोः शब्दसिद्धिः कार्या ?

(13) ग्रामता, जनता, छान्दोग्यम्, वैयाकरणः, एतेषु द्वयोः शब्दयोः शब्दसिद्धिः कार्या ?

(14) राजकीयम्, अस्मदीयः, मामकः, मध्यमः, एतेषु द्वयोः शब्दयोः शब्दसिद्धिः कार्या ?

(15) पथिकः, आह्निकम्, ज्ञानवान्, तपस्वी, एतेषु द्वयोः शब्दयोः शब्दसिद्धिः कार्या ?

(16) 'अकथितं च' इति सूत्रस्य व्याख्या कार्या ?

(17) "गतिबुद्धिप्रत्यवसानार्थ......" इति सूत्रस्य व्याख्या कार्या ?

(18) सहरिः, द्विमुनि, सप्तगङ्गम्, लोहितगङ्गम्, एतेषु द्वयोः शब्दयोः समासो विवेच्यः ?

(19) चोरभयम्, दूरादागतः, राजपुरुषः, ईश्वराधीनः, एतेषु द्वयोः सामासिकपदयोः समास-सिद्धिः कार्या ?

(20) कर्तृवाच्यस्य निरूपणं कृत्वा पञ्चवाक्यानि लिखत ।

(21) कर्मवाच्यस्य निरूपणं कृत्वा पञ्चवाक्यानि लिखत ।

(22) 'स नपुंसकम्' इति सूत्रं यथाग्रन्थं प्रतिपाद्यताम् ।

(23) 'चार्थे द्वन्द्वः' इति सूत्रं यथाग्रन्थं प्रतिपाद्यताम् ।